# पञ्चमः पाठः

प्रहेलिकां को न जानाति! कं वा जनं नाकर्षयति मनोविनोदकारिणी प्रहेलिका! एषा खलु मनोरञ्जनस्य प्राचीना विधा वर्तते। प्रहेलिका, प्रह्वलिका, उक्ति-वैचित्र्यं, वाक्केलिः इत्यादयः पर्यायशब्दाः सन्ति। प्रायशः विश्वस्य सर्वासु भाषासु प्रहेलिका प्रचलति। आंग्ल-भाषायां प्रहेलिकायाः कृते Puzzle, Riddle इत्यादि-शब्दप्रयोगः प्रसिद्धः।

प्रहेलिकायां प्रश्नः भवति, यस्य उत्तरं श्रोत्रा अन्वेषणीयं भवति। प्रहेलिका द्विविधा भवति - स्वपदोत्तर-प्रहेलिका, अस्वपदोत्तर-प्रहेलिका चेति। स्वपदोत्तर-प्रहेलिकायां पृष्टस्य प्रश्नस्य उत्तरं प्रहेलिकायाः पदेषु एव क्वचित् निहितं भवति। अस्वपदोत्तर-प्रहेलिकायां तु उत्तरं बहिरेव, न तु पदेषु निविष्टम्। प्रहेलिकासु या चमत्कृतिः दृश्यते सा कदाचित् श्लेष-यमकाद्यलंकारमाध्यमेन कदाचित् च सन्धि-समासादिमाध्यमेन उत्पाद्यते।

प्रहेलिकाः न केवलं मनोविनोद-कारिकाः अपितु बौद्धिक-व्यायाम-साधिकाः सन्ति। इयं शाब्दी-क्रीडा अपि, बौद्धिक-क्रीडा चापि विद्यते। संस्कृत-कवयः प्रहेलिका-परम्परां संवर्धितवन्तः। अस्मिन् पाठे काश्चन प्रसिद्धाः प्रहेलिकाः विविधेभ्यः ग्रन्थेभ्यः समाकृष्य प्रस्तूयन्ते। आगम्यतां, पठ्यताम्, आस्वाद्यताम्!

## वाक्केलिः

**कस्तूरी जायते कस्मात्, को हन्ति करिणां कुलम्।**
**किं कुर्यात् कातरो युद्धे, मृगात् सिंहः पलायते ।।१।।**

**भोजनान्ते च किं पेयं, जयन्तः कस्य वै सुतः।**
**कथं विष्णुपदं प्रोक्तं, तक्रं शक्रस्य दुर्लभम् ।।२।।**

**रवेः कवेः किं समरस्य सारं,**
**कृषेर्भयं किं किमदन्ति भृङ्गाः।**
**सदा भयं चाप्यभयञ्च केषां,**
**भागीरथीतीरसमाश्रितानाम् ।।३।।**

**सीमन्तिनीषु का शान्ता, राजा कोऽभूद्गुणोत्तमः।**
**विद्वद्भिः का सदा वन्द्या, अत्रैवोक्तं न बुध्यते ।।४।।**

**पानीयं पातुमिच्छामि, त्वत्तः कमललोचने।**
**यदि दास्यसि नेच्छामि, न दास्यसि पिबाम्यहम् ।।५।।**

**कं संजघान कृष्णः, का शीतलवाहिनी गङ्गा।**
**के दारपोषणरताः कं बलवन्तं न बाधते शीतम् ।।६।।**

**केशवं पतितं दृष्ट्वा, द्रोणः हर्षमुपागतः।**
**रुदन्ति कौरवाः सर्वे, हा! हा! केशव केशव ।।७।।**

**अपदो दूरगामी च, साक्षरो न च पण्डितः।**
**अमुखः स्फुटवक्ता च, यो जानाति स पण्डितः ।।८।।**

**वृक्षाग्रवासी न च पक्षिराजः,**
**त्रिनेत्रधारी न च शूलपाणिः।**
**त्वग्वस्त्रधारी न च सिद्धयोगी,**
**जलं च बिभ्रन्न घटो न मेघः ।।९।।**

**नन्दामि मेघान् गगनेऽवलोक्य,**
**नृत्यामि गायामि भवामि तुष्टः।**
**नाहं कृषिज्ञः पथिकोऽपि नाहं,**
**वदन्तु विज्ञाः मम नामधेयम् ।।१०।।**

## अन्वयः

१. कस्तूरी कस्मात् जायते? करिणां कुलं कः हन्ति? कातरः युद्धे किं कुर्यात्? मृगात् सिंहः पलायते।
२. भोजनान्ते च किं पेयम्? जयन्तः वै कस्य सुतः? विष्णुपदं कथं प्रोक्तम्? तक्रं शक्रस्य दुर्लभम्।
३. रवेः कवेः समरस्य (च) सारं किम्? कृषेः भयं किम्? भृङ्गाः किम् अदन्ति? केषां च सदा भयम्? केषां च सदा अपि अभयम्? भागीरथीतीरसमाश्रितानाम्।
४. सीमन्तिनीषु शान्ता का? गुणोत्तमः राजा कः अभूत्? विद्वद्भिः सदा का वन्द्या? अत्र एव उक्तं (उत्तरं) न बुध्यते।
५. (हे) कमललोचने! त्वत्तः पानीयं पातुम् इच्छामि। यदि दास्यसि (वितरिष्यसि, दासी+असि), न इच्छामि। (यदि) न दास्यसि (न वितरिष्यसि, न दासी+असि), अहं पिबामि।
६. कृष्णः कं संजघान? शीतलवाहिनी गङ्गा का (अस्ति)? दार-पोषण-रताः के (सन्ति)? कं बलवन्तं शीतं न बाधते?
७. केशवं पतितं दृष्ट्वा द्रोणः हर्षम् उपागतः। कौरवाः सर्वे रुदन्ति, हा केशव! हा केशव!

८. स्पष्टम्।

९. स्पष्टम्।

१०. गगने मेघान् अवलोक्य (अहं) नन्दामि, नृत्यामि, गायामि, तुष्टः (च) भवामि। न अहं कृषिज्ञः, अहं पथिकः अपि न। विज्ञाः मम नामधेयं वदन्तु!

## शब्दार्थाः

**कस्तूरी**- सुगन्धितः द्रव्यविशेषः। **कस्मात्**- कुतः (किससे, कहाँ से)। **जायते**- उत्पद्यते (उत्पन्न होती है)। **करिणाम् कुलम्**- गजानां वंशम् (हस्ति-कुलम्)। **कातरः**- कापुरुषः, भयभीतः (कायर, डरपोक)। **पलायते**- पलायनं करोति, धावति (भाग जाता है)। **भोजनान्ते**- भोजनस्य अन्ते (खाने के बाद)। **पेयम्**- पातव्यम् (पीना चाहिये)। **जयन्तः**- इन्द्रस्य पुत्रः। **सुतः**- आत्मजः, पुत्रः। **विष्णुपदम्**- विष्णोः पदम् (विष्णु का पद)। **प्रोक्तम्**- कथितम् (कहा गया है)। **तक्रम्**- दधि-निर्मितम् पेयम् (छाछ, मट्ठा)। **शक्रस्य**- इन्द्रस्य। **दुर्लभम्**- दुष्प्राप्यम् । **समरस्य**- युद्धस्य। **भृङ्गाः**- भ्रमराः। **अदन्ति**- खादन्ति। **सीमन्तिनीषु**- स्त्रीषु। **अभूत्**- अभवत्। **वन्द्या**- वन्दनीया। **अत्रैवोक्तम्**- अस्मिन् एव श्लोके कथितम्। **बुध्यते**- ज्ञायते। **पानीयम्**- जलम्। **त्वत्तः**- तव हस्ताद्। **दास्यसि**- वितरिष्यसि, तुम दोगी/पिलाओगी अथवा दास्यसि (दासी+असि)-तुम दासी हो। **संजघान**- हतवान्। **वाहिनी**- नदी। **दारपोषणरताः**- दाराणां (पत्नीनां बालानां च) पोषणे लग्नाः। पत्नियों के भरण-पोषण में लगे हुए। **बलवन्तम्**- बलशालिनम् **बाधते**- पीडयति। **केशवम्**- वासुदेवम् अथवा के=जले शवम्=मृतशरीरम्। **द्रोणः**- द्रोणाचार्यः अथवा शवभक्षकः काकः। **हर्षमुपागतः**- (हर्षम् उपागतः)- हर्षं प्राप्तः, हृष्टः। **रुदन्ति**- रोदनं कुर्वन्ति। **कौरवाः**- दुर्योधन-दुश्शासनादयः अथवा शृगालाः। **केशव**- हे वासुदेव! अथवा के=जले, शवः=मृतशरीरः। **अपदो**- चरणरहितः। **अमुखः**- मुखरहितः। **स्फुटवक्ता**- स्पष्टवक्ता। **त्रिनेत्रधारी**- त्र्यम्बकः, तीन आँखों वाला । **शूलपाणिः**- शूली, शिवः। **पक्षिराजः**- गरुडः। **त्वग्वस्त्रधारी**- वल्कलवस्त्रधारी। **जलं विभ्रत्**- जलं धारयन्। **घटः**- कलशः, घड़ा। **मेघाः** - जलदः, बादल। **अवलोक्य**- दृष्ट्वा। **नन्दामि**- आनन्दम् अनुभवामि। **तुष्टः**- प्रसन्नः । **कृषिज्ञः**- कृषीवलः, कृषकः। **पथिकः**- यात्री, पान्थः। **विज्ञाः**- ये जानन्ति। **नामधेयम्**- नाम।

## सन्धि-विच्छेदः

**भोजनान्ते**- भोजन+अन्ते। **प्रोक्तम्**- प्र+उक्तम्। **कृषेर्भयम्**- कृषेः+भयम्। **चाप्यभयञ्च**- च+अपि+अभयम्+च। **भागीरथीतीरसमाश्रितानाम्**- भा+गिर्+रथी+ईतिः+रसम्+आश्रितानाम्। **कोऽभूद्गुणोत्तमः**- कः+अभूत्+गुण+उत्तमः। **अत्रैवोक्तम्**- अत्र+एव+उक्तम्। **दास्यसि**- दासी+असि। **पिबाम्यहम्**- पिबामि+अहम्। **वृक्षाग्रवासी**- वृक्ष+अग्रवासी। **त्वग्वस्त्रधारी**- त्वक्+वस्त्रधारी। **विभ्रन्न**- विभ्रत्+न। **गगनेऽवलोक्य**- गगने+अवलोक्य। **नाहम्**- न+अहम्। **पथिकोऽपि**- पथिकः+अपि।

## प्रहेलिका-समाधानम्

१. कस्तूरीत्यत्र उत्तरम् अन्तिमे चरणे – 'मृगात् सिंहः पलायते' इति। तद्यथा– कस्तूरी कस्मात् जायते? मृगात्। करिणां कुलं को हन्ति? सिंहः। कातरो युद्धे किं कुर्यात्? पलायते।

२. भोजनान्ते इत्यत्रापि उत्तरम् चतुर्थे चरणे– 'तक्रं शक्रस्य दुर्लभम्' इति। तद्यथा– भोजनान्ते किं पेयम्? तक्रम्। जयन्तः कस्य वै सुतः? शक्रस्य। विष्णुपदं कथं प्रोक्तम्? दुर्लभम्।

३. रवेः कवेः इत्यत्र आदौ सप्त प्रश्नाः सन्ति, पश्चात् च चतुर्थे चरणे सर्वेषामेव प्रश्नानाम् एकेनैव समस्तपदेन उत्तरमस्ति–'भागीरथीतीरसमाश्रितानाम्' इति। तदित्थम्– रवेः सारं किम्? भा=कान्तिः, आभा, प्रकाशः। कवेः सारं किम्? गीः=वाणी, भाषा। समरस्य सारं किम्? रथी = वीरः। कृषेर्भयं किम्? ईतिः=अतिवृष्टिः अनावृष्टिः इत्याद्याः। (अतिवृष्टिरनावृष्टिः शलभाः मूषकाः शुकाः। प्रत्यासन्नाश्चराजानः षडेता ईतयः स्मृताः।।) भृङ्गाः किम् अदन्ति? रसम्=पुष्परसम्। केषां सदा भयम्? आश्रितानाम्=पराश्रितानाम्। केषां सदा अभयम्? भागीरथीतीरसमाश्रितानाम् अर्थात् गङ्गातीरे निवसतां सदा अभयम् वर्तते।

| १ | २ | ३ | ४ | ५ | ६ | ७ |
|---|---|---|---|---|---|---|
| भा | गी | रथी | ईती | रसम् | आश्रितानाम् | भागीरथीतीरसमाश्रितानाम्। |

४. सीमन्तिनीषु इत्यादौ प्रत्येकं चरणे यः प्रश्नः, तस्य उत्तरं तस्यैव चरणस्य आद्यन्ताक्षर-मेलनेन लभ्यते। तद्यथा– सीमन्तिनीषु का शान्ता? सीता। राजा कोऽभूद्गुणोत्तमः? रामः। विद्वद्भिः का सदा वन्द्या? विद्या।

५. पानीयम् इत्यस्मिन् पद्ये यण्सन्धेः प्रयोगः दर्शनीयः। सन्धिरहितस्य 'दास्यसि' इति क्रियापदस्य अर्थः विरोधं जनयति परमनन्तरं दासी+असि=दास्यसि इत्येवं यण्सन्धिः वैचित्र्यं चमत्कारं च उत्पादयति।

६. कं संजघान इत्यत्र सभङ्गश्लेषालङ्कारः वैचित्र्यम् उत्पादयति। तदित्थम्– कं संजघान कृष्णः? कंसं जघान। का शीतलवाहिनी गङ्गा? काशी-तल-वाहिनी। के दारपोषणरताः? केदारपोषणरताः= सजलक्षेत्रस्य पोषणकर्त्तारः, कृषकाः। कं बलवन्तं न बाधते शीतम्? कम्बलवन्तम्= कम्बलयुक्तम् जनम्।

७. केशवमिति कूटश्लोके वासुदेवं पतितं दृष्ट्वा द्रोणाचार्यः हर्षं प्राप्तः, कौरवाः च रुदन्ति इत्याद्यर्थः यदा असंगतः भवति तदा श्लेषालङ्कार-कारणाद् अपरः अर्थः प्रतीयते। महाभारतयुद्धस्य विभीषिका अत्र वर्णिता; तद्यथा– के अर्थात् जलमध्ये यदा शवस्य प्रवाहः भवति तदा तद्दृष्ट्वा द्रोणः= काकः हर्षं प्राप्नोति। किन्तु ये कौरवाः=शृगालाः भवन्ति तत्र ते तु अतिगभीरे जले गन्तुं न पारयन्ति अतः दूरादेव पश्यन्तः रोदनं कुर्वन्ति इति आशयः।

८. अपदो दूरगामी चेति स्पष्टमेव। अत्रोत्तरं सन्देश-पत्रमिति। समाचारपत्रमित्यपि वक्तुं शक्यम्।

९. वृक्षाग्रवासीत्यपि स्पष्टम्। उत्तरमत्र-नारिकेलफलम्।

१०. नन्दामि इतीदमपि सुस्पष्टम्। उत्तरमस्ति– मयूरः (नीलकण्ठः, शिखी, बर्हिः)।

# अभ्यासः

**वस्तुनिष्ठ-प्रश्नाः**

१. कस्तूरी कस्मात् जायते —

(अ) मृगयातः (आ) मार्गात्

(इ) मृगात् (ई) मृगात् मार्गात् च ( )

२. भोजनान्ते किं पेयम् —

(अ) तक्रम् (आ) नक्रम

(इ) शक्रम् (ई) वक्रम् ( )

३. 'भा' कस्य सारम् अस्ति —

(अ) रवेः (आ) कवेः

(इ) समरस्य (ई) रवेः, कवेः, समरस्य च ( )

४. 'सीमन्तिनीषु का शान्ता'-इत्यस्मिन् वाक्ये आद्यन्ताक्षरौ स्तः —

(अ) शान्ता (आ) सीता

(इ) सीषुता (ई) सीषुकाता ( )

५. 'त्वं दास्यसि'-इत्यस्य अर्थोऽस्ति —

(अ) त्वं वितरिष्यसि (आ) त्वं दासी असि

(इ) अ, आ इत्युभयमपि (ई) कश्चिद् अन्यः एवार्थः ( )

६. दासी+असि=दास्यसि- इत्यत्र सन्धिरस्ति —

(अ) यण् सन्धिः (आ) गुणसन्धि

(इ) अयादिसन्धिः (ई) पूर्वरूपसन्धिः ( )

७. नेच्छामि- इत्यस्य सन्धिविच्छेदः अस्ति —

(अ) नेच्छा+मि (आ) ने+च्छामि

(इ) नच्+इच्छामि (ई) न+इच्छामि ( )

८. दृष्ट्वा-इत्यस्य व्याकरणं किमस्ति —

(अ) दृश्+क्त्वा (आ) दृक्+क्त्वा

(इ) दृश्+ट्वा (ई) दृश्+इष्ट्वा ( )

**लघूत्तरात्मक-प्रश्नाः**

१. करिणां कुलं को हन्ति?

२. कति ईतयः? ईतित्रयस्य नामोल्लेखं कुर्वन्तु।

३. समरस्य सारं किमस्ति?

४. पिबाम्यहम्- इत्यस्मिन् कः सन्धिः?

५. द्रोणः हर्षमुपागतः- अत्र द्रोणशब्दस्य अर्थद्वयं किमस्ति?
६. कं बलवन्तं न बाधते शीतम्?
७. कं संजघान कृष्णः?
८. संजघान- इत्यत्र कः उपसर्गः?

**निबन्धात्मक-प्रश्नाः**

१. ''भोजनान्ते च.....दुर्लभम्।।'' अस्याः प्रहेलिकायाः हिन्द्या विवरणं कुर्वन्तु।
२. ''केशवं पतितं दृष्ट्वा.....केशव केशव।।'' अस्याः प्रहेलिकायाः विवरणं संस्कृतेन क्रियताम्।

## उत्तरमाला

**वस्तुनिष्ठ-प्रश्नाः**

१. (इ) २. (अ) ३. (अ) ४. (आ) ५. (इ) ६. (अ) ७. (ई) ८. (अ)